अथ गलदृक्शिक्षाऽऽरभ्यते ॥

इषे त्वाऽश्वस्तूपरः समिद्धोऽअग्नन्त्सहस्रशीर्षा पुरुषस्तदेव स्वाहा प्राणेभ्यस्त्वेत्येतेष्वध्यायेषु न गलिता ऋचः । द्वितीयेऽध्यायेऽग्ने व्रतपतऽइति पश्चात्प्रविष्टाऽतस्त्वयस्त्रिꣳशत् । तृतीयेऽध्यायेऽयमग्निः पुरीष्य इति प्रविष्टाऽतो द्विषष्टिः । पञ्चमेऽध्यायेऽग्ने व्रतपाश्च प्रविष्टोरु विष्णो गतोऽतएकाचत्वारिꣳशत् । षष्ठेऽध्याये प्रथमा ऋग्गलिता, देवतीरमङ्गमित्यच देवस्य त्वा एवं पञ्चत्रिꣳशत् । वाचस्पतय इत्यच स्वाङ्कृतोऽसि आत्मने मे सम्पृक्ते । अयन्नोऽग्नेनय लुप्तत्वाच्चतुश्चत्वारिꣳशत् । आदित्येभ्यस्त्वेत्यच कदा चन सꣳवर्चसा युग्देवा गातुविदऽउदुत्यमवस्थनिचुम्पुणोशिक्षां गलिते सप्त षट्पञ्चाशत् । देव सवितरित्यच देवस्याहमेकोनचत्वारिꣳशत् । अपो देवाऽइत्यच सोमस्य त्विषिरिमं देवा लुप्ता द्वात्रिꣳशत् । युञ्जान इत्यच युञ्जते मनो विश्वो देवस्य देव सवितः पृथिव्याः सधस्थाद्ग्नेवस्त्वाच्छृदन्तु मिलिताष्टाग्नीतिः । दृशानऽइत्यच हꣳसः शुचिषदग्नन्दग्निर्द्दृशानो रुक्मः समिधाग्निं पुनरूर्ज्जा सह-

रय्याऽयन्ते भवतन्नऽइति मिलिता अष्टोत्तरशतम् । मयि गृह्णाम्यग्निर्भूर्द्वा प्रविष्टाऽआपोऽस्पृक्षं मही द्यौर्विष्णोः कर्म्माणि चिचन्देवानां विपञ्चाशत् । ध्रुवक्षितिः शुक्रश्च विश्वकर्म्मा त्वा द्वे नभश्चेषश्च राट्यसि मिलितं सहश्च षड्विर्ठ० शत् । अग्ने जातानग्निर्भूर्द्वा त्वामग्ने पुष्करादधि भुवो यज्ञस्यायमिहाग्ने त्वमयन्ते लोकम्पृण ताऽअस्येन्द्रं विश्वा न चैता लुप्यन्ति परमेष्ठी त्वा द्वौ मिलित्वा चतुः पञ्चाशत् । नमोऽस्तु नीलग्रीवाय नमोऽस्तु रुद्रेभ्यो द्वौ मिलित्वाऽतस्त्रिषष्टिः । अश्मन्नूर्ज्जर्ठ० हिमस्य त्वा वाचस्पतिं विश्वकर्म्मन्हविषोदु त्वेंद्रंविश्वा नक्षीषासाऽग्ने तर्ठ० सम्नवतिः । वाजश्च देवस्य त्वा वाजस्य नु यास्ते यावऽउद्बुध्यस्व येन वहसि विनस्त्वँय्यविष्टैकोनसप्ततिः । खादोन्वा वायोः पूतः कुविदङ्ग त्रिणवतिः । चित्रस्य योनिः समुद्रे तऽउपयामगृहीतोऽसि पुत्रमिव निषसाद यदि जाग्रद्यदापो यदि दिवा यदेन्द्रश्च युवर्ठ० सुरामभिति नवतिः । इमम्मे तन्वा शन्नो वाजेवाजेऽवत होता यक्षदिन्द्रस्त्वष्टमस्येति सरस्वतीमेषस्येति प्रविष्टाः सप्तपञ्चाशत् । तेजोऽसि तरसवितुर्विश्वो देवस्य पृथिव्यै स्वाहा मधवे स्वाहा वाजाय स्वाहाऽसवे स्वाहेति प्रविष्टा एकोनविर्ठ० शतिः । हिरण्य-

गर्भः कुविदङ्ग कः स्वित्सूर्य्यऽएकाकी का स्विद्द्यौरा-
सीदुपयामगृहीतोऽसि सम्नमञ्चाशत् । शादन्दृङ्हि-
हिरण्यगर्भो यः प्राणतोऽग्ने त्वञ्चतुश्चत्वारिꣳ॰
शत् । अग्निश्च वैश्वानरो नः पञ्चविꣳ॰ शतिः । स-
माख्वोद्वयञ्चतुश्चत्वारिꣳ॰शत् । होता यक्षद्देवा
दैव्या शुचिसुषिहानन्तरं सर्वोऽनः पञ्चत्रिꣳ॰ शत् ।
देव सवितस्त्वसवितुर्विꣳ॰ शत् । अस्रा जरासो युच्वा
ह्ययमिह मूर्द्धानन्हिवऽउदुत्यँविश्वेऽअद्येन्द्र वायू य-
ज्ञो देवानां गावऽउप दैव्यावह्वर्य्यूऽअदब्धेभिः सम्रा-
ज्ञीतिः । यज्ञाग्यतऽआक्षष्णेन सम्नमञ्चाशत् । अग्ने-
तोऽश्वस्त्थे वः सुमित्रिया नऽउद्वयमग्नऽआयूꣳषि
ह्यष्टादश । ऋचँव्वाचम्प्रव्भुवः कया नः कस्त्वा स्तोना
ष्टथिवि आपो हिष्ठेतितिस्रो नमस्ते हरसे सुमित्रिया
नोऽभीषुणो दृते दृꣳ॰ ह त्रयोदश । देवस्य त्वा देवी
द्यावा ष्टथिवीऽन्द्रस्यौजोऽश्वस्य त्वा क्रतुजवे त्वेयत्य-
ग्ने प्रविष्टास्त्रयो हृदे त्वा युञ्जते मनः प्रैतु मखस्य
शिरस्त्रयोदश । देवस्य त्वा सुमित्रिया नऽउद्वयमे-
धोऽसीडऽएह्यदित्यै रास्नासीन्द्राय त्वा षड्डाविꣳ॰
शत् । ईशा वास्यमन्यन्तमोऽन्यदेव सम्भूतिं च मिल-
तास्त्रयोऽग्निनय त्रयोदश । एवं चतुष्षष्टिऋचो विलु-
प्तौ एकादशोत्तरशतानि ऋचोऽधिकाश्च ॥ एवं कृते

धृतिशतान्यपि सङ्ख्यकाश्च प्रोक्ताः समार्यैः खलु कण्डिकाश्च ॥ १ ॥ इति लुप्तकर्सङ्ख्यात्मिका शिक्षा समाप्ता ॥
